तोद्यम्, तोद्यम्, तुतुत्स्यम्, तोतुद्यम्;
ईषत्तोदः-दुस्तोदः-सुतोदः; — —
तुद्यमानः, तोद्यमानः, तुतुत्स्यमानः, तोतुद्यमानः;
[1]प्रतोदः, तोदः, तुतुत्सः, तोतुदः;
तोत्तुम्, तोदयितुम्, तुतुत्सितुम्, तोतुदितुम्;
तुत्तिः, तोदना, तुतुत्सा, तोतुदा;
[2]तोत्त्रम्-तोत्त्री, तोदनम्, तोदनम्, तुतुत्सनम्, तोतुदनम्;
तुत्त्वा, तोदयित्वा, तुतुत्सित्वा, तोतुदित्वा;
प्रतुद्य, प्रतोद्य, प्रतुतुत्स्य, प्रतोतुद्य;
तोदम् २, तुत्त्वा २, तोदम् २, तोदयित्वा २, तुतुत्सम् २, तुतुत्सित्वा २, तोतुदम् २; तोतुदित्वा २.

(742) "तुन्प हिंसार्थः" (I-भ्वादिः-405. सक. सेट्. पर.)

'शपि तोपति हिंसायां तत्रैव तुपतीति शे ॥' (श्लो. 138)
'तत्रैव शशपोस्तुम्पेद् अर्दने तुम्पयेण्णिचि ।' (श्लो. 139) इति देवः ।

तोपकः-पिका, तोपकः-पिका, तुतुम्पिषकः-षिका, [3]तोतुपकः-पिका;
तुम्पिता-त्री, तुम्पयिता-त्री, तुतुम्पिषिता-त्री, तोतुपिता-त्री;
तुम्पन्-न्ती, प्रस्तुम्पन् [गौः वर्तते], तुम्पयन्-न्ती, तुतुम्पिषन्-न्ती; —
तुम्पिष्यन्-न्ती-ती, तुम्पयिष्यन्-न्ती-ती, तुतुम्पिषिष्यन्-न्ती-ती; —
— तुम्पयमानः, तुम्पयिष्यमाणः, — तोतुप्यमानः, तोतुपिष्यमाणः;
तुप्-तुब्-तुपौ-तुपः; — — —
तुपितम्-तः, तुम्पितः, तुतुम्पिषितः, तोतुपितः-तवान्;
तुम्पः, तुम्पः, तुतुम्पिषुः, तोतुम्पः;
तुम्पितव्यम्, तुम्पयितव्यम्, तुतुम्पिषितव्यम्, तोतुपितव्यम्;
तुम्पनीयम्, तुम्पनीयम्, तुतुम्पिषणीयम्, तोतुपनीयम्;

---

1. प्रतुद्यतेऽनयेति करणे 'हलश्च' (3-3-121) इति संज्ञायां घञ् ।
2. 'दाम्नीशसयुयुजस्तुतुदसिसिचमिहपतदशनहः करणे' (3-2-182) इति करणे ष्ट्रन् प्रत्ययो भवति । षित्वात् स्त्रियां ङीष् ।
3. नोपधोऽयं धातुः । तेन यङि, 'अनिदितां हल उपधायाः क्ङिति' (6-4-24) इति नकारलोपः । एवं यङन्ते सर्वत्र ज्ञेयम् ।